ललायष्टिमधु । इति राजनिर्घण्टः ॥ अस्या गुणाः
स्रीतनकशब्दे द्रष्टव्याः ॥ (यष्टिमधु इति भाषाः ।)

अतिस्फिरः, त्रि, (स्फायी ओप्याया वृद्धौ अति + स्फाय + स्फायितञ्चिवञ्चिशकीत्यादिसूत्रेण रक् पृषोदरादित्वात् आयभागस्य इ अतिवृद्धः) अतिस्फूर्त्तिशाली । तत्पर्य्यायः । स्फेठः २ । इति जटाधरः ॥

अतिहसितं, क्ली, (अतिशयेन हसितं हास्यं हस् + भावे क्तः ।) अतिशयहास्यं । इति जटाधरः ॥ (ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च । नीचानामपहसितं तथातिहसितञ्च षड्भेदाः ॥ "मधुरस्वरं विहसितं सांसशिरःकम्पनमवहसितं । अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितं" ॥ इति साहित्यदर्पणे ॥)

अतिहासः, पुं, (अतिशयेन हासः हास्यम् अति + हस् + भावे घञ् ।) सशब्दहासः । तत्पर्य्यायः । अनुस्यूतः २ । इति हेमचन्द्रः ॥

अतीतं, त्रि, (अति + इण् + क्तः) भूतकालः । तत्र तिखो घी टी ठी विभक्तयो भवन्ति । यथा भवद्भूतभव्ये विशः क्याद्याः । क्याद्याः क्यस्तिबस्तिस्वः क्रमाद्वर्त्तमानातीतभविष्यत्सु कालेषु स्युः । इति मुग्धबोधव्याकरणं ॥ तस्य लक्षणादि यथा । वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वं । लङ्लुङोरतीतत्वं । लिट्क्वस्वोर्व्वक्तुः परोक्षत्वं अतीतत्वञ्च । लुङोऽतीतत्वं क्रियातिक्रमस्य । कुतश्चिद्वैगुण्यात् क्रियानिष्पत्तिः क्रियातिक्रमः । क्तक्तवत्वोरतीतत्वं । इति सारमञ्जरी ॥

अतीतः, त्रि, (अति इण् कर्त्तरि क्तः ।) मृतः । भूतः । अतिक्रान्तः । यथा,—
"न नश्यं न्यूनसप्तास्दे नातीताशीतिवत्सरे" ।
इति वैद्यकपरिभाषा ॥ सङ्गीतशास्त्रमते मानप्रभेदः ॥

अतीन्द्रियं, त्रि, (इन्द्रियमतिक्रान्तम् अत्यादीति समासः ।) अप्रत्यक्षं । प्रत्यक्षाविषयं । इन्द्रियागोचरं । इन्द्रियाग्राह्यं । इत्यमरः ॥
("योऽसावतीन्द्रयग्राह्यःसूक्ष्मोऽव्यक्तः सनातनः"।
इति मनुः ।
"अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः" ॥ इति रघुवंशे ॥)

अतीव, व्य, (अत्येव इव अवधारणे प्रादिसमासः, अवष्टतातिशयेऽत्यन्तातिशये च ।) अतिशयः । इत्यमरः ॥
("अहं हि कारणं श्रुत्वा वैरस्यातीवमानद" ॥
इति रामायणे ॥)

अतीसारः, पुं, अतिसाररोगः । इति वैद्यकं ॥

अतुलः, पुं, (नास्ति तुला सादृश्यं यस्य सः ।) तिलवृक्षः । इति शब्दचन्द्रिका । तुलनारहिते त्रि ॥
("राक्षसेन्द्रप्रभावेण श्रिया चातुलया तया" ॥
इति रामायणे ॥)

अतुल्यं,त्रि, (न तुल्यं सदृशं नञ्समासः ।) निस्तुल्यं । अनुपमं । असाम्यं । असदृशं । यथा,—
"अतुल्यमहसा साकं मम रामेण विग्रहः" ।
इति भट्टिः ॥

अतुष्टिकरं, त्रि, (तुष्टिं सन्तोषं करोति तुष्टि + कृ + कर्त्तरि टच् उपपदसमासः स्त्रियां ङीप् अतुष्टिकरी ।) सन्तोषाजनकं । यथा मनुः,—
"अनिर्द्दशञ्च प्रेतान्नं अतुष्टिकरमेव च" ॥
इत्याह्निकतत्त्वं ।

अतृप्तिः, स्त्री, (तृप् + भावे क्तिन् न तृप्तिः सन्तोषः नञ्समासः । बहुव्रीहौ तु तृप्तिरहितः असन्तोषकरः ।) तृप्त्यभावः । अपरितुष्टिः । अन्नाभिलाषः । यथा,—
"उष्मातृप्तितमः प्रवेशदहनं कट्वम्लतिक्ता रसा।
वर्णः पाण्डुविवर्जितःक्षयितता कर्म्माणि पित्तस्य वै"
इति रक्षितः ॥ अतृप्ते त्रि ॥

अतेजः, [स्] क्ली, (न तेजः तेजोविरोधितमः नञ्समासः ।) छाया इति राजनिर्घण्टः ॥ तेजोरहिते त्रि ॥

अत्कः, पुं, शरीरावयवः । अङ्गं । इत्युणादिकोषः ॥

अत्कः, त्रि, (अतति सततमनित्यतया विकारं गच्छति अत् + कन् अतति सततं गच्छति अत् + कन्) पथिकः । पान्थः । इत्युणादिकोषः ॥

अत् ट ङ अतिक्रमे । वधे । इति कविकल्पद्रुमः ॥ दन्त्यवर्गाद्योपधः । ङ अतिट्टिषते । इति दुर्गादासः ॥

अत्ता, स्त्री, (अतति सततं स्नेहं संबध्नाति अत् + तक् स्त्रियां टाप् ।) माता । ज्येष्ठा भगिनी । इत्यमरटीकायां रमानाथः ॥ अत्ता मातायजसखा । इति नानार्थकोषः ॥ प्राकृतभाषायां श्वश्रूः । इति साहित्यदर्पणटीका ॥

अत्तिः, स्त्री, (अत्यते सततं कर्म्मणि सम्बध्यतेऽनया, अत् करणे क्तिन् माता च ।) नाट्योक्तौ ज्येष्ठा भगिनी । इति शब्दरत्नावली ।

अत्तिका, स्त्री, (अत्ति + स्वार्थे कन्) अन्तिका । नाट्योक्तौ ज्येष्ठा भगिनी । इति भरतः द्विरूपकोषश्च ।

अत्नुः, पुं, (अतति सततं गच्छति अत् + कर्त्तरि न वायुः सततगन्ता पथिकः ।) सूर्य्यः । इत्युणादिकोषः ॥

अत्यः, पुं, (अतति शीघ्रं गच्छति अत् + कर्त्तरि यत्, क्वचिदपवादविषयेऽप्युत्सर्गोऽप्यभिनिविशते इति न्यायात् अन्यथा हलन्तात् ण्यति आत्य इति स्यात् द्रुतगामी अश्वः ।) अश्वः । वैदिकशब्दोऽयं ॥

अत्यन्तं, क्ली, (अन्तं सीमामतिक्रान्तम् अत्यादीति समासः ।) अतिशयः । यथा । अत्यन्तं कठिनौ तथापि हृदयानन्दाय वक्षोरुहौ । इति नरहरिकविः ॥

अत्यन्तकोपनः, त्रि, (अत्यन्तं कोपनः क्रोधशीलः द्वितीयातत्, कुप् + कर्त्तरि युच् ।) अतिशयक्रोधी । तत्पर्य्यायः । चण्डः २ । इत्यमरः ॥

अत्यन्तगामी, [न्] त्रि, (अत्यन्तं शीघ्रं गच्छति अत्यन्त + गम् + णिनि उपपदसमासः ।) अतिशयगमनशीलः । अतिशीघ्रगमनकर्त्ता । तत्पर्य्यायः । अत्यन्तिकः २ । इति हेमचन्द्रः ॥

अत्यन्तः सुकुमारः, पुं, (अत्यन्तः सुकुमारः कर्म्मधारयः ।) कङ्गुनीवृक्षः । इति राजनिर्घण्टः ॥

अत्यन्तिकः, पुं, (अत्यन्तं गच्छति अत्यन्त + ठन् ठस्येक इति ठस्य इकः अति सातिशयमन्तिकं कर्म्मधारयः, अतिनिकटम् ।) अतिशयभ्रमणकर्त्ता । अत्यन्तगामी । इति हेमचन्द्रः ॥

अत्यन्तीनः, त्रि, (अन्तस्यात्ययः अव्ययीभावसमासः । अत्यन्तं गामी द्वितीयातत्पुरुषः । लक्ष्मीं परम्परीणां त्वमत्यन्तीनत्वमुन्नये इति भट्टिः ।) भृशगामी । अतिशयगमनशीलः । इत्यमरः ॥

अत्यम्लं, क्ली, (अत्यन्तः अम्लोरसः फलपत्रादौ यस्य सः ।) वृक्षाम्लं । इति राजनिर्घण्टः ॥ तेँतुल इति भाषा ॥

अत्यम्लपर्णी, स्त्री, (अत्यम्लं पर्णं पत्रं यस्याः सा जातित्वात् ङीप् ।) लताविशेषः । तत्पर्य्यायः । तीक्ष्णा२ कण्डुरा ३ वल्लिसूरणः ४ करवल्ली ५ वयस्था ६ अरण्यवासिनी ७ । अस्य गुणाः । तीक्ष्णाम्लत्वं । प्लीहशूलविनाशित्वं । वातहारित्वं । अभिरुचिकारित्वं । गुल्मश्लेष्मरोगापहारित्वञ्च । इति राजनिर्घण्टः ॥

अत्यम्ला, स्त्री, (अत्यन्तः अम्लरसो यस्याः सा स्त्रियां टाप्) वनवीजपूरः । मधुरलेवु । मधटावा इति ख्याता । इति रत्नमाला ॥

अत्ययः, पुं, (अति + इण् + भावे अच् ।) मृत्युः । अतिक्रमः । दण्डः । दोषः । कृच्छ्रं । इत्यमरः ॥
("जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ।
आकाशमिव पङ्केन न स पापेन लिप्यते ॥
इति मनुः ॥)

अत्यर्थं, क्ली, (अर्थमतिक्रान्तं अत्यादीति समासः ।) अतिशयः । तद्विशिष्टे वाच्यलिङ्गं । इत्यमरः॥ ।
("लक्ष्मणो राममत्यर्थमुवाच हितकाम्यया" ।
इति रामायणे ॥)

अत्यल्पं, त्रि, (अत्यन्तमल्पं मनाक् ।) यत्किञ्चित् । अतिसूक्ष्मं । तत्पर्य्यायः । अल्पिष्ठं २ अल्पीयः ३ कणीयः ४ अणीयः ५ । इत्यमरः ॥

अत्याकारः, पुं, (अति आधिक्येन आकारः तिरस्कारः । आ + कृ + भावे घञ् ।) अतिशयितः । आकारो देहः कर्म्मधा । वृहद्देहः । अतिशयितः आकारो यस्य सः तद्विशिष्टः ।) न्यक्कारः । तिरस्कारः । इति हेमचन्द्रः ॥

अत्याचारं, क्ली; (आचारमतिक्रान्तं अत्यादीति समासः ।) विरुद्धाचरणं । आचारमतिक्रम्य इत्यव्ययीभावसमासनिष्पन्नं ॥

अत्याचारः, पुं, (अति अनुचित आचारः कर्म्मधा ।) अनुचिताचारः । अमङ्गलाचरणं । आचारोल्लङ्घनं । अन्यायः । (अति अनुचितः आचार आचरणं यस्य सः अन्यायाचरणकारी ।)

अत्याज्यं, त्रि, (त्यक्तुं न शक्यं अति त्यज् + शक्यार्थे ण्यत्, कुत्वाभावः ।) त्यागानर्हं । अत्यक्तव्यं । अत्यजनीयं । यथा, यत्तु पतितस्त्रीगमनस्य लघुत्वं प्रायश्चित्तविवेककृद्भिरुक्तं तदत्याज्यापरं । इति प्रायश्चित्ततत्त्वं ॥